*Siddhanta's International Journal of Advanced Research in Arts & Humanities*
*Vol. 3, No. 2, November – December 2025*

# उत्कलीयस्मृतिनिबन्धग्रन्थेषु उत्कले प्रचलितव्रतोत्सवानां महत्वम्

**राजलक्ष्मी कर**
शोधछात्रा, संस्कृतविभाग, महाराजा पूर्णचन्द्र भञ्जदेओ विश्वविद्यालय, ओडिशा

**"वर्षाणां भारतः श्रेष्ठः देशानामुत्कलः स्मृतः ।**

**उत्कलस्य समो देशो देशो नास्ति महीतले" ॥**

**सारांश**

इति कपिलसंहितोक्तवचनाद्[1] उत्कलस्य प्रशस्तिविषये अस्माभिः ज्ञायते । यद्यपि भारतस्य प्रदेशान्तरदृष्ट्योत्कलस्य भौगोलिकं स्वरुपं तथा न प्रशस्तं तथापि धार्मिकं सांस्कृतिकञ्च स्वरुपं सर्वानतिशेते । वस्तुत उत्कलोऽयमन्वर्थसंज्ञकः । यतो हि सर्वासु कलासु चायं देश सर्वानतिक्रामति उत्कर्षञ्चावहति । अयमुत्कलदेशः भगवतः श्रीजगन्नाथस्य देश इति कथनेन न काऽप्यत्यूक्तिः भवेत् । अस्य देशस्य कला संस्कृतिश्च जगन्नाथसंस्कृत्या सह सम्मिलिताऽस्ति ।

**कूटशब्दाः-** उत्कलः,व्रतम्, पर्व,नैमितिकम्, संक्रान्ति,राधाष्टमी

जगन्नाथप्रान्तदेशस्योत्कलः परिकीर्त्तितः इति अस्मिन् जगन्नाथदेशे उत्कलप्रान्ते कला संस्कृतिश्च यादृशी सुदृढा तादृशमपि तस्य व्रतोत्सवानां पर्वाणां यात्राणाञ्च महत्त्वं दृश्यते । व्रतोत्सवानुष्ठानं भारतीयसमाजव्यवस्थायाः लौकिक्याऽऽध्यात्मिकतायाश्चोन्नतेः सुशक्तं साधनम्। तेषामनुष्ठानेन उदात्तजीवनं जीवितुं प्रेरणा लभ्यते। दुःखभयशोकमोहा-ज्ञानादीनामात्यन्तिकनिवृत्तिपूर्वकमखण्डानन्दाप्राप्तिरेव व्रतादीनां परमं चरमञ्च लक्ष्यम् । वृञ् वरणे धातोः बाहुलकान् अतच् प्रत्ययेन व्रतशब्दो निष्पद्यते । पुण्यजनकोपवसादिस्मत्पर्यायः । उपवासादिनियमभेदश्च।व्रतञ्च सम्यक् संकल्पजनितानुष्ठेय-क्रियाविषयस्वरुपम् । तच्च प्रवृत्तिनिवृत्त्युभयरुपम् । कृत्यविशेषभोजनपूजादिकं प्रवृत्तिरुपम्। उपवासादिकञ्च निवृत्तिरुपम् । तच्च पुनः नित्यं नैमित्तिकं काम्यञ्च । नित्यमेकादश्यादिव्रतम्। नैमित्तिकं चान्द्रायणादिव्रतम् । काम्यं तु विशिष्टकामनां हृदि निधाय समाचरितानि उपवासादिरुपम् गौरीव्रतम्-वटसावित्रीव्रतादिनि । 'व्रियते इति व्रतम्' 'व्रजत्यनेन स्वर्गमिति' वा । तदनुष्ठानं व्रतानुष्ठानमित्यर्थः । तत्र देवलः-

"अभुक्त्वा प्रातराहारं स्नात्वा चैव समाहितः ।

सूर्यादिदेवताभ्यश्च निवेद्य व्रतमाचरेत् ॥

ब्रह्मचर्यं तथा शौचं सत्यमामिषवर्जनम् ।

व्रतष्वेतानि चत्वारि वरिष्ठानीति निश्चयः" ॥

अत्र व्रतस्य प्रातः संकल्पकालः । यथा-

"प्रातः संकल्पचेद् विद्वान् उपवासव्रतादिकम् ।

नापराह्णे न मध्याह्ने पित्र्यकालौ हि नो स्मृतौ" ॥

इति वराहपुराणोक्तवाक्यत्वात् ।

---

[1] क,सं.१.८.

उत्कलीयपरम्परानुसारं यात्रा उत्सवाः पर्वणि व्रतानि च बहूनि सन्ति । सर्वादौ भगवतः श्रीजगन्नाथस्य प्रमुखाः द्वादशयात्राः सन्ति । यथा-

"मञ्चस्नानं रथवरगतिः शायनं चायने द्वै ।

पाश्वावर्त्ति शयनपरिवर्त्तनिः प्रावृत्तिः पुष्यपूज्या ॥

दोलकेलिर्दमनकऽमहोऽक्षयपुण्यतृतीया ।

यात्राः स्कान्दे हरिप्रतिमयोद्वादशेति प्रणीताः" ॥[2]

यथा- १.देवस्नानपूर्णिमा २.श्रीगुण्डिचा ३.शयन्यैकादशी ४.उत्थापनैकादशी ५. पार्श्वपरिवर्त्तनैकादशी ६. प्रावरणषष्ठी ७. पुष्याभिषेकः ८.दोलोत्सवः ९.दक्षिणायानसंक्रान्तिः १०.उत्तरायणसंक्रान्तिः ११.दमनकचतुर्दशी १२.अक्षयतृतीया चेति ।

एकाम्रक्षेत्रे भुवनेश्वरे श्रीलिङ्गराजदेवस्य चतुर्दशयात्राणां प्रसिद्धिः पुराणोक्ता यथा-

"यात्राद्य प्रथमाष्टमी निर्गहिता प्रावरषष्ठी तथा ।

पुष्यास्नानमथाज्यकम्बलविधिमाघे सिता सप्तमी ॥

तद्वत्स्याच्छिवरात्रिका रथगतिः स्याद्दमनं भञ्जनम् ।

पुण्याक्षयतृतीयिका परशुरामायाष्टमी शायनम्" ॥[3]

उक्ते तत्र पवित्रारोपणयमद्वैतीयिके चेत्थितिः ।

क्षेत्रे श्रीभुवनेश्वरस्य विहिता यात्राश्चतस्रो दश" ॥

यथा- १.प्रथमाष्टमी २. प्रावरणषष्ठी. ३.पुष्याभिषेकः ४.घृतकम्बलविधिः ५.माघसप्तमी ६.शिवरात्रिः ७ .अशोकाष्टमी(रथयात्रा) ८.दमनकचतुर्दशी ९.अक्षयतृतीया १०.परशुरामाष्टमी ११.शयनचतुर्दशी १२.पवित्रारोपणम् १३.य़मद्वितीया १४.उत्थापनचतुर्दशी चेति ।

अस्माकमुत्कलीयपरम्परानुसारं बहूनामुत्सवानामपि संग्रहः शास्त्रेषु दृश्यते। यथा- १. मिथुनसंक्रान्तौ भूमिरजस्वला (तस्याः संक्रान्ते पूर्वोत्तरदिनग्रहणेन दिनत्रयं रजमहोत्सवः), २.शीतलषष्ठी (ज्येष्ठशुक्लषष्ठीमनुष्ठीयते,अत्र शिवपार्वतीविवाहः) ३.चम्पकद्वादशी (ज्येष्ठशुक्लद्वादशी).४.वराहजन्म(माघशुक्लद्वादशी)५.हिङ्गुलायात्रा(चैत्रपूर्णिमा)६.जगधात्रीपूजा- अलानवमी (कार्त्तिकशुक्लनवमी)७.कार्त्तिकपूर्णिमा (समुद्र-नदी-पुष्करिण्यादिषु नौकावन्दापना), ८.झुलणयात्रा (श्रावणशुक्लएकादशीतः आरभ्य श्रावणपूर्णिमां यावत्) चेति ।

अस्माकमुत्कलीयसंस्कृतौ परम्पराप्रसिद्धानि बहूनि सुप्रसिद्धानि व्रतानि सन्ति। तानि व्रतानि उत्कलस्य ग्रामे ग्रामे पुरपल्लीषु चानुष्ठितानि भवन्ति । यथा-

१.महाविषुवसंक्रान्ति –(उत्कलीयनवसंवत्सरः) २.सावित्रीव्रतम् -(ज्येष्ठामावास्या)

३.चित्रामवास्या –(श्रावणामवास्या) ४.बलदेवपूजा-(श्रावणपूर्णिमा)

५.रक्षापञ्चमी –(भाद्रकृष्णपञ्चमी) ६.हरितालिका- (भाद्रशुक्लचतुर्थी)

---

2 चक्रसंग्रहकारिकावचनमिति.का.सा.पृ-२०१

3 का.सा.पृ-२१०

७.ललितासप्तमी –(कुक्कुटीव्रतम्- भाद्रशुक्लसप्तमी)  ८.राधाष्टमी- (भाद्रवशुक्लाष्टमी)

९.अनन्तव्रत –(भाद्रवशुक्लचतुर्दशी)  १०.वामनजन्म (सुनिआँ)-(भाद्रवशुक्लद्वादशी)

११.भागवतजन्म – (भाद्रवपूर्णिमा)  १२.मूलाष्टमी –(दूतिवाहनव्रत- आश्विनकृष्णाष्टमी)

१३.कुमारपूर्णिमा -(आश्विनपौर्णमासी)  १४.गोष्ठाष्टमी- (कार्त्तिकशुक्लाष्टमी)

१५.आकाशदीपदानम्- (कार्त्तिकमास)  १६. वडओषा (शिवव्रतम्)- (कार्त्तिकशुक्लचतुर्दशी)

१७.भीष्मपञ्चकम्-(कार्त्तिकशुक्लैकादशीतः पूर्णिमां यावत्) १८.बकुलामावास्या- (पौष्यामावास्या)

१९.भद्राष्टमी- (पौषशुक्लाष्टमी)  २०.भीष्माष्टमी- (माघशुक्लाष्टमी)  २१.शाम्बदशमी- (पौषशुक्लदशमी)  २२.वराहचतुर्थी- (माघशुक्लचतुर्थी)

२३.श्रीपञ्चमी-वसन्तपञ्चमी-(माघशुक्लपञ्चमी)  २४.अग्न्युत्सवः-(माघपुर्णिमा)

२५.सुदशाव्रतम्- (शुक्लदशमीगुरुवारे)  २६.गङ्गादशहरा-(ज्येष्ठशुक्लदशमी)

२७.नृसिंहचतुर्दशी-(वैशाखशुक्लचतुर्दशी) चेति।

एवमेव प्रकारेण केचन पर्वोत्सवाः ,काश्चन यात्राः ,कानिचिद् व्रतानि चोत्कलदेशे प्रचलितानि प्रसिद्धानि च सन्ति। एतान् व्रतोत्सवान् विहाय पुरपल्लीषु प्रचलितानि कानिचिद् लौकिकओषाव्रतानि सन्ति। येषां तु शास्त्रीयप्रमाणाभावादत्र मया तानि नोल्लिखितानि।

## उत्कलप्रचलितव्रतोत्सवानां पर्वाणां च पर्यालोचना-

पुण्यभूमेर्भारतवर्षस्य धार्मिकं सांस्कृतिकं ऐतिह्यमतीव गौरवावहमिति सुविदितं समेषां विदुषाम्। तद् भूमौ लब्धजनीनां व्यास-वशिष्ठादिमहर्षिणामाचारः परम्परयाऽस्माभिरनुष्ठेयः ,तेषामुपदेशो धर्मत्वेनाऽऽचरणमादर्शत्वेन,तेषामादेशश्च नियमत्वेन न केवलमेतद्देशीयैरस्माभिर्गृह्यतेऽपितु समग्रपृथिवीवासीरेव।

अत एवोक्तं मनुना-

"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।

स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः" ॥[4]

उत्कले बहूनां सम्प्रदायानां बह्वीनां संस्कृतीनाञ्च समन्वयो दृश्यते। अत्र गणेश-भास्कर-विष्णु-दुर्गा-शिवानां पञ्चदेवानामुपासना परम्परया प्रचलति। शङ्करस्याद्वैतवादादारभ्य रामानुज-रामानन्द-विष्णुस्वामी-निम्बार्क-चैतन्यदर्शनपर्यन्तं विभिन्नैर्मतवादैः परिपूर्णोऽयमुत्कलदेशः। अस्य पुरुषोत्तमक्षेत्रे विराजमानस्य भगवतो जगन्नाथस्य सर्वभारतीयमतवादो वर्वर्ति सर्वोपरि। तत्र सर्वेषां धर्माणां सर्वेषां सम्प्रदायानाञ्च समन्वयो दृश्यते।

यद्यपि विविधमतवादीनां विविधान्येव व्रतानि सन्ति तथापि उत्कलदेशे समाजे च प्रचलितानि यानि परम्पराप्रसिद्धानि व्रतानि तानि यद्यपि बहूनि सन्ति तथापि तेषां समेषां सारसंग्रहपूर्वकं येषु येषु व्रतेषू उत्सवेषु च शास्त्रीयप्रमाणानि उत्कलीयधर्मशास्त्रग्रन्थेषु प्राप्यन्ते केबलमात्रं तान्येनात्र मया पर्यालोच्यते-

**१.महाविषुवसंक्रान्तिः-**

[4] मनु.२.१०

विषुवसंस्कान्तिद्वयम् ।मेषराशौ यदा सूर्यस्य संक्रमणं तथा मेषसंक्रान्तिर्वा महाविषुवसंक्रान्तिर्जायते । तुलाराशौ यदा सूर्यस्य संक्रमणं तदा तुलासंक्रान्तिर्वा जलविषुवसंक्रान्तिर्भवति । अयं दिवसो भवति उत्कलीयनववर्षारम्भदिवसः । संकटमोचनहनुमातोऽयं जन्मदिवसः । अस्यां संक्रान्तौ पादुकाच्छत्रादीनां दानेन महाफलं यथा कृत्यकौमद्यां सुमन्त्रुः-

"विप्रेभ्यः पादुके छत्रं पितृभ्यो विषुवे शुभान् ।

सक्तूश्च शर्करामिश्राम् दद्यान् सजलशर्कराः" ॥[5]

प्रपादाने वाक्यमिदं यथा-

"प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता ।

अस्याः प्रदानात् तृप्यन्तु पितरश्च पितामहाः" ॥

अत्र मासत्रयं मासद्वयं वा प्रपादानं मन्तव्यम् । यथा महाभारते

निदाघकाले पानीयं यस्य तिष्ठत्यवारितम् ।

सदुर्गविषमं कृच्छ्रं न कदाचिदवाप्नुयात् ॥[6]

प्रपायामावान्तरोपकरणदानेऽपि फलमुक्तं विष्णुधर्मोत्तरे-

"रज्जुं दत्वा प्रपास्थाने मोक्षे भवति मानवः ।

वारिधानी तथा दत्वा तदेव फलमाप्नुयात् "॥[7]

इति वचनानुसारं उत्कलस्य पुरपल्लीषु परम्परानुसृत्य तुलसीदेव्याः पूजनपूर्वकं रज्वा वारिधानी प्रदीयते । अश्वत्थवृक्षमूलेऽपि धर्मकुम्भप्रदाने महत्फलं प्राप्नुयात् । गयाश्राद्धे यथा श्राद्धं पार्वणविधिना क्रियते, तथैवायनद्वये विषुवदिनत्रयोऽपि पार्वणविधिना श्राद्धं कर्त्तव्यमिति।

**२.सावित्रीव्रतम्-**

ज्येष्ठकृष्णत्रयोदशीतः आरभ्य दिनत्रयं सावित्रीव्रतम् । परम्परानुसारमुत्कलप्रान्ते ज्येष्ठामावास्यां सावित्रीदेव्याः पूजनं स्त्रीभिः क्रियते । यथा-

शतानन्दसंग्रहे- "ज्येष्ठकृष्णत्रयोदश्यां त्रिरात्रं व्रतमाचरेत् ।

सावित्रीं पूजयेददेवीत्सङ्गस्थमृतप्रभूमे ॥

त्रिदान्नोपोषणं व्रत स्त्रीणां नान्यत शास्त्रैः ।

कार्यं पत्युरनुज्ञातं वैधव्यं न लभेत्क्वचित् "॥[8]

अनेन व्रतेन नारीभिः वैधव्यं न लभ्यते इति प्रमाणं शास्त्रेषु विद्यते । एतदर्थं सधवानारिभिः व्रतमिदं महासमारोहेण मध्याह्नेऽनुष्ठीयते ।

---

[5] कृ.कौ.पृ-१४

[6] महा,अनु..६७.२.,६४.६

[7] विष्णु.धर्म.३.२९८.४.९

[8] का.सा.पृ-१९८,स्मृ.सा.सं.पृ-१०१,,का.नि.पृ-४२३

**३.चित्रामावास्या-**

श्रावणमावास्यायामिदं चित्रामावास्याव्रतमनुष्ठीयते । अस्मिन् दिने पूर्यां श्रीमन्दरे श्रीजगन्नाथस्य श्रीवलदेवस्य सुभद्रादेव्याः शिरसि रत्ननिर्मितचित्रविचित्रपदार्थस्यार्पणं भवति। परम्परानुसारं ख्रीष्टियत्रयोदशशताब्दीतः अस्य पर्वनीतेः पालनं प्रचलतीति केचन प्रमाणयन्ति । पद्मपुराणस्य वचनं यथा कालचन्द्रिकायाम्-

"दर्शे श्रावणमासस्य संगुडं चित्रपिष्टकम् ।

यो दद्याद्वरेये तस्य नश्येदक्षयदानकम् "॥[9]

इति वचनानुसारमुत्कलवासिभिः सर्वैः गृहे गृहे गुडमिश्रितचित्रपिष्टकेन विष्णोः कृते नैविद्यार्पणं क्रियते ।

**४.वलदेवपूजा-**

श्रावणपूर्णिमायां भगवतो बलदेवस्य पूजा । बलदेवः भगवतो दशष्ववतारेषु अन्यतमः । अयं दिवसो भवति बलदेवस्य जन्मोत्सवः । अस्मिन् दिनेऽपि भ्रातृभगिन्योः पवित्रसम्पर्कमाधारीकृत्य रक्षावन्धनमनुष्ठीयते । बलदेवजन्मोत्सवे गोपूजनमपि विधीयते । अयं बलदेवः हलधारीति मन्यते । तस्मादेव कारणात् कृषिदेवतारुपेण एतेषां प्रसिद्धिः सर्वसम्मता । श्रावणशुक्लैकादशीत आरभ्य पूर्णिमां यावत् सर्वेषु मन्दिरेषु राधाकृष्णयोः दोलयात्रा(झुलणयात्रा) अनुष्ठीयते । अस्मिन् दिनेऽपि वेदारम्भकर्म उपाकर्म विधीयते । देववाण्याः संस्कृतभाषायाः अप्ययं जन्मोत्सवः दिवसेऽस्मिन् बलदेवस्योत्थापनविधि-रनुष्ठीयते । यथा स्मृतौ-

"अमावास्यां उभादित्ये लक्ष्मीनिद्रां विमुञ्चति ।

सुखरात्रेकाले प्रदीप्ते ज्वलनम् लाभम् ॥

गावो महिष्यच्छागाद्या पूज्यः शोभास्तथा दिने ।

पूजनं मेदिनिच्छन्ति श्रावण्यां तु गवादीनाम् " ॥[10]

पुनश्च धवलसंग्रहे बलदेवोत्थापनविषये यथा-

"विष्णोस्तु शयनाद्वर्ध्वं मासेनान्तरितं द्विजाः ।

उपाकर्म सदा कुर्युः मदनान्तरं न तु" ॥[11]

अस्मिन् दिने रक्षासूत्रवन्धनं सर्वत्रमनुष्ठीयते । देवद्विजातिस्तु वत्सैः रक्षासूत्रेण आच्छादित्वा तदनु पुरोधाऽनेनैव मन्त्रेण रक्षां वध्नीत । यथा-

"येन बद्धो वलीराजा दानवेन्द्रो महासुरः ।

तेन त्वामपि बध्नामि रक्षामाचर माचल "॥[12]

---

[9] का.च.पृ-६०

[10] स्मृ.सा.सं.पृ-१११,का,च.पृ-६१,प.स.पृ-१११,का.दी.पृ-९२

[11] का.नि.पृ-३९३

[12] का.सा.पृ-१९२

श्रावणपौर्णमास्यां यः रक्षाबन्धनं कृत्वा वर्षं यापयति । स पुत्रपौत्रादिसहित सुखं लभते । यथा- कृतकौमुद्याम्-

यः श्रावणे श्रवति शीतजले सुरेन्द्र ।
रक्षाविधानमिदमाचरते मनुष्यः ॥
असौ सुखेन परमेण सवर्षमेकं
पुत्रपौत्रादिसहितः ससुहृज्जनश्चेति ॥[13]

**५.रक्षापञ्चमी-**

भाद्रवकृष्णपञ्चम्यां रक्षापञ्चमी । अस्मिन् दिने रक्षावन्धनं कर्त्तव्यम् । दिनेऽस्मिन् कृष्णवर्णादिवर्णकैः नामानालित्वा गन्ध-पुष्प-पायस-गुग्गुलैः पूजयेत् । अत्र रक्षाकरणे मन्त्रो यथा-

"घण्टाकर्णमहावीर सर्ववाधानिवारणम् ।
सर्वौपद्रवसंहारः विद्रावणहरप्रियः ॥
कण्ठे यस्य महानीलं भूषणं यस्य पन्नगाः ।
तेजांसि तस्य देवस्य रक्षन्तु मम मन्दिरम्" ॥[14]

अधुनाऽपि श्रौतस्मार्तपरम्परामुत्कलादेशे प्रायशः गृहे गृहे केचन ब्राह्मणपरिवारेषु गृहद्वारदेशे मन्त्रमिमं विधिएव गृहरक्षामाचरन्ति ।।

**6.षष्ठीदेवी षष्ठी-**

भाद्रवशुक्लपक्षषष्ठ्यां तिथौ षष्ठीदेवी षष्ठीव्रतम् । व्रतमिदमुत्कलस्य गृहे गृहे परिपाल्यते। एवं रुपेण धर्मविश्वासोऽस्ति यत् शिशोः जन्मतः षष्ठरात्रौ उजागरस्य विधिरस्ति। नारीभिः सन्तानस्य निरोगकामनार्थमिदं व्रतं क्रियते । अनेन व्रतेन शिशोरायुवृद्धिः आरोग्यलाभश्च भवतीति उत्कलीयानां विश्वासः । यथा स्कान्दे-

"यथा भाद्रस्य शुक्लायां षष्ठी षष्ठ्या प्रपूजिता ।
जीवत्पुत्रा च सौभाग्य धनधान्यसुखान्विताः॥
तस्यान्दन्देन नार्यश्च पूजदन्ति सदैव तु "॥[15]

एषा सप्तमीयुक्ता ग्राह्या । यथा- विष्णोधर्मोत्तरे-

"एकादश्यष्टमी षष्ठी दशमी च चतुर्दशी ।
अमावास्या तृतीया च ता उपेष्याः परान्विता"॥[16] इति वचनात् ।

**१०.राधाष्टमी-**

---

[13] कृ.कौ.पृ-३४
[14] का.नि.पृ-१२०,का.च.पृ-६७,प.स.पृ-११३,का.सा.पृ-८७,का.स.पृ-१३७

[15] का.च.पृ-९०,का.दी.पृ-३५
[16] का.दी.पृ-९०

हिन्दुधर्मशास्त्रानुसारं राधाष्टमीव्रतमत्यन्तपवित्रं व्रतम् । श्रीराधा लक्ष्मीस्वरुपिणी । भाद्रवशुक्लाष्टम्यां राधाष्टमीव्रतम् । अस्मिन् दिने उत्कलवासिभिः महासमारोहेण राधाजन्माष्टमी परिपाल्यते । विशेषतः सुभगानार्यैरेव मध्याह्नसमये श्रीराधिकायाः जन्मोत्सवः परिपाल्यते । देशान्तरेषु उत्सवोऽयं न दृश्यते । यथा- ब्रह्मवैवर्त्ते-

"भाद्रवे शुक्लपक्षे तु अष्टम्यां द्विजसत्तम ।
जेष्ठायां प्रादुभवद्राधिका कृष्णवल्लभा ॥
तस्या त्वां पूजयेद्राधां कृष्णं च उपवाससाम् ।
उपचौरस्तु बटुभिर्भक्ष्यैनानाविधैरपि ॥
मण्डले सर्वतोभद्रे पूजयेद्राधिकां ततः ।
अर्च्चयेत्प्रियसखीह्येषा पार्शेषु निखिलष्वपि ॥
एवं कुर्वन्नरो भक्त्या राधाजन्मदिनोत्सवम् ।
प्रेमभक्तिपरोऽदेवं राधाकृष्णान्तिकं व्रजेत्"।।

अस्यः श्रीराधाजन्मष्टम्याः कालस्तु मध्याह्न एव । यतो हि अस्मिन् दिने मध्याह्नसमये एव श्रीराधा जाता । यथा-

"तस्यां श्रीराधिका जाता श्रीमद्वृन्दावनेश्वरी ।
भाद्रे मासि सिताष्टम्यां मध्याह्ने शुभदायिनी " ॥[17] इति

श्रीराधाष्टमीव्रतपालनेनाशेषपुण्यप्राप्तिर्भवतीति विश्वासः । सांसारिकदुःखादपि मनुष्यः मुक्ता भवतीति विश्वासोऽस्ति ।

## उपसंहारः -

एवं सम्यगवलोकिते उत्कलीयस्मृतिनिबन्धेष व्रतोत्सवानां महत्त्वं न केवलं धार्मिकदृष्ट्या, अपि तु सामाजिक-सांस्कृतिकदृष्ट्यापि अतिशयेन प्रतिपादितम्। एते व्रतोत्सवाः लोकाचारपरम्परायाः संवाहकाः, धर्मार्थकाममोक्षाणां साधनभूताश्च भवन्ति। आचारनिष्ठा, शुद्धाचारः, दानशीलता, लोकसङ्ग्रहश्च एतेषां मूलतत्त्वानि सन्ति। व्रतानुष्ठानेन व्यक्तेः आत्मशुद्धिः, उत्सवपालनेन समाजस्य ऐक्यवर्धनं च जायते। अत एव उत्कलीयस्मृतिनिबन्धेषु प्रतिपादितं व्रतोत्सवमहत्त्वं उत्कलीयसंस्कृतेः आत्मा इव विद्यते-यत् परम्परासंरक्षणं, नैतिकमूल्यसंवर्धनं, लोकजीवनस्य सौहार्दपूर्ण विन्यासं च निरन्तरं साधयति।

---

[17] का.च.पृ-९४

## सहायकग्रन्थसूची

1. अमरकोषः (रामाश्रमीसहितः) -चौखम्वा संस्कृत सीरिज आफिस्,1970
2. कपिलसंहिता- प्र. रत्नाकरगर्गवटुः, राधारमणपुस्तकालयः, कटकम्, 1931
3. कालदीपः -सं. पण्डितकुलमणिमिश्रकर्मा, श्रीनारायण प्रेस्, पुरी,1982
4. कालचन्द्रिका-सं. प्रो. खगेश्वरमिश्रः, पुरी
5. कालमाधवः- माधवाचार्यः, वेंकटेश्वरप्रेस्, मुम्वई
6. कालसारः(गदाधरराजगुरूप्रणीतः)- प्र. रत्नाकरगर्गवटुः, राधारमणपुस्तकालयः, कटकम्, 1931
7. कृत्यकल्पतरूः-लक्ष्मीधरभट्ट, बरोडा,1950
8. कृत्यकौमुदी-बृहस्पतिसूरिः, डाँ. जयकृष्णमिश्रः -श्रीनारायण प्रेस्, पुरी, 1982
9. पण्डितसर्वस्वम्- प्रो. विद्याधरसाहुः, धर्मग्रन्थस्टोर, कटकम्, 1970
10. व्रतविधानपद्धति-सं. गणेश्वररथः, न्यू ओरिसा पव्लिसिं हाउस्, 1961
11. स्मृतिसारसमग्रहः -श्रीविश्वनाथमिश्रः, दत्तप्रेस्, कटकम्, 1915